# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(Old)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.C.3.5.10** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –15/10/2019 | सन्दर्भग्रन्थः – महाभाष्यम्, उणादि सूत्राणि च | |

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ कयोरपि द्वयोरुत्तरे लेख्ये।** १०

१ अकारस्य विवृतोपदेशेन किं प्रयोजनमिति भाष्योक्तदिशा व्याख्येयम्।

२ सन्ध्यक्षरेषु वर्णैकदेशा: वर्णग्रहणेन न गृह्यन्ते इति साधकबाधकयुक्तिपुरस्सरं विविच्यताम्।

३ किमर्थमन्तस्थानामण्सूपदेशः क्रियते? इति व्याख्येयम्।

**प्रश्न २ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ प्रत्याहारसूत्रेषु हकारस्य द्विरूपदेशे किम्प्रयोजनमिति भाष्योक्तदिशा व्याख्यायताम्।

२ वर्णसमाम्नाये समुपदिष्टानां वर्णानां सार्थकत्वमनर्थकत्वं वा इति साधक-बाधकयुक्तियुक्तं विवेचनीयम्।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ कयोरपि द्वयोरुत्तरे लेख्ये।** १०

१ 'वृद्धिरादैच्' इत्यत्र चकारस्य 'चोः कुः' इत्यनेन कुत्वं कस्मान्न भवतीति व्याख्यायताम्।

२ 'इको गुणवृद्धी' इति सूत्रे इक् -ग्रहणस्य प्रयोजनम् विलिख्यताम्।

३ 'इको गुणवृद्धी' इति सूत्रे वृद्धिग्रहणं किमर्थम् इति भाष्यकारमतेन व्याख्यायताम्।

**प्रश्न ४ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ 'वृद्धिरादैच्' इति सूत्रे संज्ञाबोधाय संज्ञाधिकारः कर्तव्यो न वा इति भाष्यदिशा स्पष्टं विवेचनीयम्।

२ 'इकोगुणवृद्धी:' इति सूत्रम् 'अलोऽन्त्यस्य' इत्यस्य शेषः आहोस्वित् अपवादः इति विशदं विवेचनीयम्।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कयोरपि द्वयोरुत्तरे लेख्ये। (सूत्रव्याख्या)** १०

१ ऊर्णोतेर्णुलोपश्च

२ अगारे णिच्च

३ कृषिचमितनिधर्निमर्जिखर्जिभ्य ऊः

**प्रश्न ६ कस्यदिदेकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ कुणादिभ्यः कित् सूत्रं सोदाहरणं व्याख्येयम्।

२ 'अशेर्निच्च' सूत्रं सोदाहरणं व्याख्येयम्।

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशानां प्रश्नानाम् उत्तराणि लिखत।** १०

१ द्वितीयाह्निकस्य किं नाम?

२ शब्दानां प्रवृत्तिः कतिविधाऽस्ति?

३ 'आतोऽनुपसर्गे कः' इति सूत्रेण विहिते 'क' –प्रत्येय कः अनुबन्धः ?

४ संयोगपूर्वस्य अच: क संज्ञा भवति?

५ अक्षरसमाम्नाये उपदिष्टः अकारः विवृतः वा संवृतः वा ?

६ भगवता पतञ्जलिना तृतीयाडिनके कति सूत्राणि व्याख्यातानि?

७ छप्रत्ययविधायकं सूत्रं किम्?

८ वृद्धिः आत् ऐच् इत्यत्र आकारस्य तपरकरणं किमर्थं क्रियते?

९ वृद्धिग्रहणं किमर्थम्?

१० अञ्चुधातुः कस्मिन्नर्थे प्रयुज्यते?

११ मिथिलादिषु शब्देषु कः प्रत्ययः ?

१२ जीवेरातुः सूत्रेण कः प्रत्ययः?

१३ अण रण इति शब्दार्थः कस्मिन्नर्थे पठितः?

१४ 'मृजेष्टिलोपश्च' सूत्रस्यार्थः कः?

१५ हन धातोः कः अर्थः?